M1 begins with श्रीरामाय नम —(1 1) D5 7 T2 G M2 त्वश्रु , D6 T1 3 M3 Cg चाश्रु-, M1 Ck अश्रु , Ct as above (for आशु) M2 दुरावरेण (for °सदेन) —(1 2) D6 G1 हि, T2 G2 M2 सु-, Cg k च (for तु) D7 [अ]मिहुना (for °प्लुता) —(1 5) D5 8–10 पश्यन् (1or वीक्ष्य) —(1 6) D5 निर्विण्ण ५ —(1 8) D5 स प्रति-, T2 सपरि- (for सपरि-) —(1 10) D5 तदा तम्, G3 उपात्तम् (for उदात्तम्) —(1 11) D8 9 M2 लक्ष्मण-, Cg k t as above (for लक्षण-) —(1 15) D8–10 सूनो (for -पुत्र) —(1 16) D5 8–10 Ck t हत , Cg as above (for सह) —(1 17) D6 तस्या G1 हि, G2 च (for तु) D9 रुदत्या —(1 18) D6 T G3 M1 पुत्रे, Cg t as above (for पुरे) D8–10 Ck t [s]ति- (for च) —(1 19) D5 8–10 नृपे (for ऽग्रजे) —(1 20) M3 सुरते (for रमते) —(1 21) T2 om (hapl) दनिविप्रधर्षा —(1 23) G3 -पुगवे (for -नृपे) —(1 24) D5 6 8–10 T1 G1 2 M1 2 Ct सुतीक्ष्णम् (for °ग्रम्) D5 8–10 Ct वर प्र- (for -कुमार) D6 तप्ये, G1 M2 तेपे (for तप्स्ये) —(1 26) D5 8–10 हि (for नि-) D6 8 10 Cg ऋष्यमूके —(1 27) M2 सु- (for स्व-) —(1 29) D8 T G M1 त्वा, Cg k t as above (for त्वा) —(1 32) D9 om मिद D5 8–10 M1 Ck t वच (for पुन) M1 वचो (for च मे) —(1 34) M1 (after corr *pr m* as above) वन (for वध) D5 8–10 M3 राम वि-, Ct as above (for राघव) —(1 35) M3 पार (for मार) —(1 36) D5 6 T G M2 3 Cr m g न (for वि-) D6 T2 राम (for काम-) D6 -पुरस्कृत, M1 पुरःसर (for °स्कृत) D8–10 Ct [s]पि (for मन्) ❀ Cv अचिन्तयन्। किं राज्य बलवत् उत भ्रातृवियोगदु ख बलवत् इत्यचिन्तयन्नित्यर्थ ।, Cr न चिन्तयन्। भ्रातृवधप्राप्तराज्यस्य दु खस्य च सारमुत्कर्ष न चिन्तयन् अचिन्तयन्।, Cm न चिन्तयन् भ्रातृवधात्प्राप्तस्य राज्यस्य भ्रातृवधजनितदु खस्य चोत्कर्ष न चिन्तयन् उभयोस्तारतम्य न चिन्तयन्नित्यर्थ ।, Cg न चिन्तयन्। उभयोस्तारतम्यमचिन्तयन्नित्यर्थ ।, Ck विचिन्तयन्निति पाङ्क । विगणयन्न विचारयन्नित्यर्थ ।, Ct विचिन्तयन्विचारयन् ❀ —(1 37) D6 [s]स्य (for हि) D5 मते, T2 महान् (for मनो) D5 समाहार्य- (for स्वमाहात्म्य-) Ck t -व्यतिक्रमात् ❀ Cv r स्वमाहात्म्याव्यतिक्रमात् वालिनो निजमाहात्म्यापरित्यागात्।, Cm स्वमाहात्म्याव्यतिक्रमात् स्वमाहात्म्यानुल्लङ्घनात्।, Cg स्वमाहात्म्यस्य स्वमहत्त्वस्य अव्यतिक्रमात्। अनतिक्रमणात्।, Ck स्वमाहात्म्यव्यतिक्रमात्। अनुचितकृत्यनोपशय (°यश ?)प्रसङ्गप्रभावादित्यर्थ ।, Ct स्वमाहात्म्यव्यतिक्रमादनुचितकर्मकारी वालीत्ययश प्रसङ्गभयात् ❀ —(1 38) G1 3 -माहात्म्यात्, M1 -मोहाद्धि, M2 -[अ]माहा° (for दोरात्म्यात्) D10 G1 2 -हारि-, Cm हानि-, Cg k t as above (for -हारी) —(1 39) D9 -विभग्नो (for -[अ]व°) D9 मुहूर्त (for °र्तं) D5 T2 -चिन्तयन्, T3 -निश्चयन्, M3 -नि ८ (lacuna) (for -निष्टनन्) —(1 40) M1 अर्हति (for °त्सि) ❀ Cr कर्तुमर्हसीत्यत्रेतिकरण द्रष्टव्यम्।, Cm कर्तुमर्हसीत्यनेन वालिना उक्त इति सबन्ध ।, Cg न पुन कर्तुमर्हसि युद्धमिति शेष । अत्रेतिकरण द्रष्टव्यम्।, Ct पुनरेव दुश्चेष्टा कर्तुं नार्हसीत्युक्त . ❀ —(1 42)

Arya Research Team

भ्रातृत्वमार्यभावश्च धर्मश्चानेन रक्षित ।
मया क्रोधश्च कामश्च कपित्व च प्रदर्शितम्।
अचिन्तनीय परिवर्जनीय-
मनीप्सनीय स्वनवेक्षणीयम्।
प्राप्तोऽस्मि पाप्मानमिम नरेन्द्र [45]
भ्रातुर्वधात्त्वाष्ट्रवधादिनेन्द्र ।
पाप्मानमिन्द्रस्य मही जल च
वृक्षाश्च काम जगृहु स्त्रियश्च।
को नाम पाप्मानमिमं क्षमेत
शाखामृगस्य प्रतिपत्तुमिच्छन्। [50]
नार्हामि ममानमिम प्रजाना
न यौवराज्य कुत एव राज्यम्।
अधर्मयुक्त कुलनाशयुक्त-
मेवविध राघव कर्म कृत्वा।
पापस्य कर्तास्मि विगर्हितस्य [55]
क्षुद्रस्य लोकावमतस्य चैव।
शोको महान्मामभिवर्ततेऽय
वृष्टेर्यथा निम्नमिवाम्बुवेग ।
सोदर्यघातापरगात्रवाल
सतापहस्ताक्षिशिरोविषाण । [60]

एनोमयो मामभिहन्ति हस्ती
दृप्तो नदीकूलमिव प्रवृद्ध ।
अहो बतेद नृवराविषह्य
निवर्तते मे हृदि साधुवृत्तम्।
विवर्णमग्र्यो परितप्यमान [65]
किट्ट यथा राघव जातरूपम्।
महाबलाना हरियूथपाना-
मिद कुल राघव मन्निमित्तम्।
अस्याङ्गदस्यापि च शोकतापा-
दूर्ध्वस्थितप्राणमितीव मन्ये। [70]
सुत सुलभ्य सुजन सुवश्य
कुतस्तु पुत्र सदृशोऽङ्गदेन।
न चापि विद्येत स वीर देशो
यस्मिन्भवेत्सोदरमनिकर्ष ।
यद्यङ्गदो वीरवराई जीवे- [75]
जीवेत माता परिपालनार्थम्।
त्रिना तु पुत्र परितापदीना
तारा न जीवेदिति निश्चित मे।
सोऽह प्रवेक्ष्याम्यतिदीप्तमग्नि
भ्रात्रा च पुत्रेण च सत्यमिच्छन्। [80]

D5 om (hapl) कामश्च —(1 44) D8 अभीप्सनीय G2 हि, G3 तु (for सु-) M3 -[अ]नपेक्षणीय —(1 45) M3 om (hapl) from नरेंद्र up to मिम in 1 49 D5 मया (for प्राप्तो) D8-10 Ct इद (for इम) D5 8-10 T G M1.2 वयस्य (for नरेन्द्र) —(1 46) T3 वृत्र- (for त्वाष्ट्र-) G1 यथा (for इव) —(1 49) T2 इद (for इम) D5 8-10 G3 Cm t महेत, G1 2 M1 2 वयस्य, Cg as above (for क्षमेत) —(1 50) T1(before corr) G2 M1 Cr -हर्तुम्, T2 -हतुम्, Cg k t as above (for -पत्तुम्) D5 8-10 G M1 2 Cm t इच्छेत्, Cg इच्छन् (as above) ❀ Cr प्रतिहर्तुं परिहर्तुम्।, Cm 'प्रतिहतुमिच्छेत्' इति पाठ। परिहर्तुं को वा इच्छेत् को वा महेतेति सबन्ध।, Cg प्रतिपत्तु किंचिदद्वार प्राप्तुमिच्छन्।, Ck प्रतिपत्तु प्राप्तुमनर्हामीति त्रावग्रस्तत्वादिति शेष।, Ct प्रतिपत्तु प्राप्तु क इच्छेत् ❀ —(1 51) D6 G1 M2 अह, G2 इद (for इम) —(1 56) D6 लोकस्य कृतस्य, D8-10 M3 Cg.k t °पकृतस्य, G1 °यमतस्य (for लोकावमतस्य) D8-10 लोके (for च्च) D5 लोके परिनिंदितस्य —(1 57) G1 लोको (for शोको) M2 3 अभिवर्तयेय (for अभिवततेऽय) —(1 58) ❀ Cv निम्नमिवाम्बुवेग वृष्टेरम्बुवेग इव शोक निम्नमिव मामभिवर्तत इति यथेवशब्दयोर्निर्वाह।, Cr वृष्टेरम्बुवेगो यथा तथा भूतो महान् निम्नमिव मामभिवर्तत इति सबन्ध।, Cm इवशब्दस्तथार्थे। वृष्टेरम्बुवेगो यथा तथा महान् शोको मामनुवर्तते।, Cg वृष्टेरुत्पन्नोऽम्बुवेगो यथा तादृशशोको मा निम्नमिवाभिवर्तते। उभयत्राप्युपमावाचकप्रयोगो महाकविनिव धनेश्वरस्येव।, Ck वृष्टेर्वेगो यथा तथा शोको निम्नमिव मा प्राप्नोति।, Ct: शोको मामिव तथाभिवर्तते यथा वृष्टेरम्बुवेगो निम्नम्। इवशब्दस्तथाशब्दार्थे। ❀ —(1 59) D5 6 9 सोदय- T2 -पातादनि- (for -घातापर-) —(1 60) D5 -हस्तो (for -हस्त) T2 -विषाद (for °ण) —(1 61) D6 अपि हनि, D9 अप°; M1 °हत (for अभिहन्ति) —(1 62) G2 हस्ती (for दृप्तो) —(1 63) D10 T2 Cv अहो Cr m g k t as above (for अहो) M3 [अ]विषह्य (for °ह्य) ❀ Cv अहो बत अविषह्य न वर्तते किट्ट यथा इति च पाठ। एव सति अहो बतेद इदमविषह्य पर कष्ट मे सजात किमिति चेन्मे हृदि साधुवृत्त सज्जनचरित न वर्तते। नावनिष्ठते। यथा विवर्ण ताम्रादिमलयुक्तमत एवाग्र्यो परितप्यमान जातरूप किट्टे ताम्रादौ न वर्तते तथेत्यर्थ।, Cr g अविषह्य असोढ्वा।, Cm अविषह्य पृथक्कृत्य यथा निवर्तते तथा।; Ck नृवराविषह्यमिति पाठ। हे नृवर! ईदृगविषह्य सोढुमशक्यमह प्राप्य मे हृदि स्थित साधुवृत्त प्रागनुष्ठित पुण्यकर्म च स्मृत्यायत्तत्वात् प्रबलेनाहसा निवर्तते। बत खेदे। तत्र दृष्टान्तो विवर्णमित्यादि। विवर्णमत एवाग्र्यो परितप्यमान प्रबल जातरूप प्राप्य किट्ट मल यथा निवर्तते तथेत्यर्थ। परन्तु अविषह्येति ल्यबन्तमङ्गीकृत्य व्याकरोदिव।, Ct विवर्णमत एवाग्र्यो परितप्यमान जातरूपमविषह्य सोढुमशक्यमहाबन्धान प्राप्य किट्ट मल यथा निवर्तते तथेत्यर्थ। यथा बलवतोत्तमेनाधम स्थातु न शक्नोति तथा बलवताधमेन सहोत्तमोऽपीत्याशय। एव चानेन पापेन सर्वपुण्यक्षयो जात इति तात्पर्यम्। केचित्तु अग्र्यो परितप्यमान जातरूप स्वर्ण यथा विवर्ण विवर्णताकारक किट्ट दाहक्षारद्रव्य प्राप्य निवर्तते भस्म भवति तथेत्यर्थ इत्याहु। ❀ —(1 65) M2 विवर्तम् (for °र्णम्) D5 8-10 transp. विवर्णम् and अग्र्यो —(1 66) D6 कीट, T2 कील (for किट्ट). —(1 68) G2 महा- (for दृढ). —(1 70) D6 -स्थित (for स्थित-) D10 M3 अतीव (for इ°). —(1 71) M2 स्वजन. (for सुजन) M1 सुवश (for सुवश्य) G3 transp सुलभ्य and सुवश्य —(1 72) T2 G1 3 M3 सु- (for तु) —(1 75) D5,8-10 अद्य (for यदि) D5 -वरो हि, D8-10 -वरो न, G1 ममार्हे (for वरार्हे) —(1 76) T1 2 M3 जीवेच्च (for जीवेत) —(1 77) M1 परिदृश्यमाना —(1. 78) D5 8-10 Ct मा नैव (for तारा न) G2 निश्चयो (for निश्चित). —(1 80)

इमे विचेष्यन्ति हरिप्रवीरा
सीता निदेशे तव वर्तमाना ।
कृत्स्न तु ते सेत्स्यति कार्यमेत-
न्मय्यप्यतीते मनुजेन्द्रपुत्र ।
कुलस्य हन्तारमजीवनार्हं [85]
रामानुजानीहि कृतागस माम् ।
इत्येवमार्तस्य रघुप्रवीर
श्रुत्वा वचो वालिजघन्यजस्य ।
सजातबाष्प परवीरहन्ता
रामो मुहूर्तं विमना बभूव । [90]
तस्मिन्क्षणेऽभीक्ष्णमवेक्षमाण
क्षितिक्षमावान्भुवनस्य गोप्ता ।
रामो रुदन्ती व्यसने निमग्ना
समुत्सुक सोऽथ ददर्श ताराम् ।
ता चारुनेत्रा कपिसिंहनाथा [95]
पति समाश्लिष्य तदा शयानाम् ।
उत्थापयामासुरदीनसत्त्वा
मन्त्रिप्रधाना कपिराजपत्नीम् ।
सा विस्फुरन्ती परिरभ्यमाणा
भर्तुं सकाशादपनीयमाना [100]
ददर्श राम शरचापपाणि
स्वतेजसा सूर्यमिव ज्वलन्तम् ।
सुसवृत पार्थिवलक्षणैश्च
त चारुनेत्र मृगशावनेत्रा ।
अदृष्टपूर्वं पुरुषप्रधान- [105]
मय स काकुत्स्थ इति प्रजज्ञे ।
तस्येन्द्रकल्पस्य दुरासदस्य
महानुभावस्य समीपमार्या ।
आर्तातितूर्णं व्यसनाभिपन्ना
जगाम तारा परिविह्वलन्ती । [110]
सा त समासाद्य विशुद्धसत्त्वं
शोकेन सभ्रान्तशरीरभावा ।
मनस्विनी वाक्यमुवाच तारा
राम रणोत्कर्षणलब्धलक्ष्यम् ।
त्वमप्रमेयश्च दुरासदश्च [115]
जितेन्द्रियश्चोत्तमधार्मिकश्च ।
अक्षय्यकीर्तिश्च विचक्षणश्च
क्षितिक्षमावान्क्षतजोपमाक्ष ।
त्वमात्तबाणासनबाणपाणि
र्महाबल सहननोपपन्न । [120]
मनुष्यदेहाभ्युदय विहाय
दिव्येन देहाभ्युदयेन युक्त ।
येनैव बाणेन हत प्रियो मे
तेनैव मा त्व जहि सायकेन ।
हता गमिष्यामि समीपमस्य [125]
न मामृते राम रमेत बाली ।
स्वर्गेऽपि पद्मामलपत्रनेत्र
समेत्य सप्रेक्ष्य च मामपश्यन् ।
न ह्येष उच्चावचताम्रचूडा
विचित्रबेपाप्सरसोऽभजिष्यत् । [130]
स्वर्गेऽपि शोक च विवर्णता च
मया विना प्राप्स्यति वीर वाली ।
रम्ये नगेन्द्रस्य तटावकाशे
विदेहकन्यारहितो यथा त्वम् ।
त्व वेत्थ तावद्धनिताविहीन [135]
प्राप्नोति दु ख पुरुष कुमार ।

M₂ स (for first च) M₂ (after corr *inf lin sec m* as above) तस्यम् (for सख्यम्) —(1 82) D₅ ₆ ₈₋₁₀ G₃ M₁ परि- (for तव) —(1 84) D₆ ₉ M₃ मय्यप्रतीते, T₂ अपि त्व° (for मय्यप्य°) —(1 88) T₂ M₁ ₃ वाल्यनुजस्य तस्य —(1 89) M₂ म (for स-) —(1 91) M₁ अस्मिन D₅ om (hapl ?) from ण up to मा in 1 92 D₆ M₃ अवेक्ष्यमाण, T₂ अमीक्षमाण ❀ Cg परवीरहन्ता आश्रितविरोधि निरसनशील । ताच्छील्ये तृच् ❀ —(1 93) G₁ निमग्न (for °ग्ना) —(1 94) D₆ [ऽ]पि (for ऽव) —(1 95) T₂ G₂ ₃ M₃ Ck -नाथ, Ct as above (for -नाथा) —(1 96) M₁ तथा (for तदा) —(1 98) D₆ -प्रवीरा (for -प्रधाना) T M₃ -वीर- (for -राज-) —(1 100) D₅ ₈₋₁₀ समीपाद् (for सकाशाद्) —(1 104) D₆ श्रुत च पूर्वं, G₁ ₃ M₁ ₂ सा सांत्त्व (M₂ तत्त्व) पूर्वं, Cg as above (for त चारुनेत्र) —(1 105) D₆ पुरुष (for °ष-) —(1 106) M₁ काकुत्स्थम् (for °त्स्थ) —D₁₀ om 1 107–110 —(1 109) M₂ (after corr *inf lin sec m* as above) [अ]सि (for [अ]ति-) D₅ ₈₋₁₀ व्यसन प्रपन्ना —(1 111) D₅ ₈₋₁₀ G₂ ₃ M₁ transp सा and त T₂ सु- (for वि-) D₆ M₃ -सत्त्वा, G₁ तत्त्व (for -सत्त्व) —(1. 112) D₆ T₃ -भारा (for -भावा) —(1 114) D₆ -लक्ष (for -लक्ष्यम्) —D₅ om 1 115–118 T₁ om (hapl) 1 116–117. —(1 116) D₈₋₁₀ Ct -धर्मकश्च, Cr g -धार्मिकश्च (as above). —(1 117) D₈₋₁₀ G₁ Ct अक्षीण-, Cg as above (for अक्षय्य-) —(1 118) G₃ क्षिति (for क्षिति-) —(1 123) M₃ [ए]क (for [ए]व) —(1 124) D₅ ₈₋₁₀ तेनैव बाणेन हि मा जहीहि —(1 125) M₃ (after corr *pr m* as above) हत्त्वा (for हता) —(1 126) D₅ ₈₋₁₀ विना वीर (for ऋते राम) —(1 127) T₂ -पद्म- (for -पत्र-) G₃ M₁ ₃ -नेत्रा, Cr g -नेत्र, Ck t as above (for -नेत्र) —(1 128) G₃ सप्रेष्य —(1 129) D₆ [ए]व (for [ए]प) M₂ चारु (for ताम्र-) —(1 130) G₂ भजिष्यति (for ऽभजिष्यत) ❀ Cv नाभजिष्यत् न भजिष्यति। लृटर्थे लृट्। विचित्रबेपाप्सरस । आर्ष सन्धि । समानो वास्तु ।, Cr नाभजिष्यत् न भजिष्यति लृटर्थे लृट्। विचित्रबेपाप्सरस इत्यार्ष सन्धि । समानो वा ।, Cg t नाभजिष्यन्न भजिष्यति (Cg लृटर्थे लृट्) ❀ —(1 132) G₃ लप्स्यति (for प्रा°) —(1 133) T₂ रणावकाशे (for तटा°) —(1 135) G₁ वेत्सि (for वेत्थ) D₆ यावद् —(1 136) T₁ G₁ ₂ कुमार (for °र) ❀ Cg कुमार युवा।, Ct कुमार सुन्दर पुरुष । यद्वा दु खहेतुमाह-कुमार इति कुत्सितो मारो यस्य मारकत्वेन

तत्त्व प्रजानन्नहि मा न वाली
दुःख ममादर्शनज भजेत।
यद्यापि मन्येत भवान्महात्मा
स्त्रीघातदोषो न भवेत्तु मह्यम्। [140]
आत्मेयमस्येति हि मा जहि त्वं
न स्त्रीवध स्यान्मनुजेन्द्रपुत्र।
शास्त्रप्रयोगाद्विविधाच्च वेदा-
दात्मा ह्यनन्य पुरुषस्य दारा।
दारप्रदानाद्धि न दानमन्य- [145]
त्प्रदृश्यते ज्ञानवता हि लोके।
त्व चापि मा तस्य मम प्रियस्य
प्रदास्यसे धर्ममवेक्ष्य वीर।
अनेन दानेन न लप्स्यसे त्व-
मधर्मयोग मम वीर घातात। [150]
आर्तामनाथामपनीयमाना
मेवविधामर्हसि मा निहन्तुम्।
अह हि मातङ्गविलासगामिना
प्लवगमानामृषभेण धीमता।
विना वराहोत्तम हेममालिना [155]
चिर न शक्ष्यामि नरेन्द्र जीवितुम्।
इत्येवमुक्तस्तु त्रिभुर्महात्मा
तारा समाश्वास्य हित बभाषे।
मा वीरभार्ये विमति कुरुष्व
लोको हि सर्वो विहितो विधात्रा। [160]
त चैव सर्व सुखदु खयोग
लोकोऽप्रवीत्तेन कृतं विधात्रा।
त्रयोऽपि लोका विहित विधान
नातिक्रमन्ते वशगा हि तस्य।
प्रीति परा प्राप्स्यसि ता तथैव [165]
पुत्रश्च ते प्राप्स्यति यौवराज्यम्।
यात्रा विधान विहित तथैव
न शूरपत्न्य परिदेवयन्ति।
आश्वासिता तेन तु राघवेण
प्रभावयुक्तेन परतपेन। [170]
सा वीरपत्नी ध्वनता मुखेन
सुघोषरूपा विरराम तारा।

Colophon

15

After 4 26 4, $D_{5\,6\,8-10}$ S ins

कृत्वा च समय राम सुग्रीवेण महाबल।
कालयुक्त महद्वाक्यमुवाच रघुनन्दन।
विनीत भ्रातर भ्राता लक्ष्मण लक्ष्मिवर्धनम्।
इय गिरिगुहा रम्या विशाला युक्तमारुता।
अस्या वत्स्याम सौमित्रे वर्षरात्रमरिन्दम। [5]

मदनन्य प्रसिद्धे, अथवा कुत्सितो मारो मरण यस्य मरणादपि दुःखजनकत्वादेवमुक्ति। भावे घञ् ❀ —(1 137) $D_{5\,6}$ T_3 $G_{1\,2}$ $M_{1\,2}$ Cr तत्स(D_5 °त्स)प्रजानन्, $T_{1\,2}$ °बोधञ्, G_3 तस्मात्त्वमार्ता, Cg as above (for तत्त्व प्रजानन्) G_1 न हि (for जहि) ❀ Cr जहि मा न वालीति पाठ ❀ —(1 138) G_2 शोक (for दुःख) T_2 न मा (for मम) —(1 139) D_6 G_1 तच् (for यच्) ❀ Cv यद्यापीत्यादेर्ध्वार्धपरत आत्मेयमस्येति हि मा जहि त्व न स्त्रीवध स्यान्मनुजेन्द्रपुत्र। शास्त्रप्रयोगाद्विविधाच्च वेदादात्मा ह्यनन्य पुरुषस्य दारा। इत्येष पाठक्रम। अस्य भ्रशो विपर्यासश्च लेखकप्रमादकृत।, Cr यद्यापि मन्येत भवान्महात्मा स्त्रीघातदोषो न भवेत्तु तुभ्यम्। आत्मेयमस्येति च मा जहि त्व न स्त्रीवध स्यान्मनुजेन्द्रपुत्र। शास्त्रप्रयोगाद्विविधाच्च वेदादात्मा ह्यनन्य पुरुषस्य दारा। दारप्रदानाद्धि न दानमन्यत्प्रदृश्यते ज्ञानवतां हि लोके। इति पाठक्रम।, Cm यद्यापीति सार्धश्लोक वाक्यम्।, Cg यद्यापीत्यादि सार्धश्लोक ❀ —(1 140) T_3 $M_{1\,2}$ च (for न) D_6 T_3 च, D_8 न (for तु) —(1 141) D_6 G M च (for हि) —M_1 reads 1 143-144 after 1 148 —(1 143) M_1 दानाद् (for वेदाद्) —(1 144) $D_{5\,8-10}$ अ(D_5 [marg also] त्म)नन्यरूपा (for आत्मा ह्यनन्य) —(1 145) T_2 दारा-, G_1 M_1 दान (for दार-) D_6 M_3 transp हि and न —(1 146) D_5 ज्ञानवतो —(1 148) G_3 अपेक्ष (for °क्ष्य) —(1 150) G_3 -योगान् (for योग).—(1 151) G_3 तत्ताम (for आर्ताम्) —(1 152) $D_{5\,6.8-10}$ $G_{2\,3}$ -गना नार्हसि, G_1 M_2 -विधा नार्हसि (for -विधामर्हसि). $D_{6\,8-10}$ Ct अहतुम्; $G_{1.2}$ M_2 न ह°, Ck वि° (for निहन्तुम्). —(1 157) G_1 M_2 मुहुर् (for विभुर्) —(1 158) G_1 M_2 हि ता (for हित) —(1 163) D_5 $T_{2.3}$ G_2 $M_{1\,3}$ हि (for ऽपि) T M_1 विधातुर्, G_3 °त्रा (for विधान).—(1 164) G_2 वशमागतस्य, M_3 (after corr *sec m* as above) °गो हि तस्य (for °गा हि तस्य) —(1 165) G_1 प्रिया (for परा). $D_{5\,8\,10}$ M_1 प्राप्स्यति, Ct as above (for °सि) —(1 166) M_3 तु (for च) —D_5 om from त in 1 167 up to प्राप्त in 4 24 9^b —(1 168) G_2 वीर- (for शूर-) T_2 -वेदयति(meta ?) (for -देवयन्ति) —(1 169) $D_{6\,8-10}$ G $M_{1\,2}$ महात्मना तु(D_6 °त्र) (for तु राघवेण) —(1 171) G_1 M_2 स्वनता मुखेन, G_2 रमणीयकामात् (for ध्वनता मुखेन) —(1 172) D_6 रामा (for तारा)

Colophon D_5 om —*Sarga no* (figures, words or both) $D_{6\,8-10}$ T $G_{1\,2}$ M 24, G_3 23 —After colophon, $G_{1\,2}$ conclude with श्रीरामाय नम, G_3 श्रीमते रामानुजाय नम

15

D_9 om from 1 1 up to वत्स्याम in 1 5 —(1. 1) G_1 म कृत्वा (for कृत्वा च) T $M_{1\,3}$ सौम्य (for राम) —(1 2) D_8 om from इहाश्रय up to गिरिगु in 1 4 —(1. 3) ❀ Cm लक्ष्मिवर्धनमित्यत्र ह्रस्वश्छान्दस ❀ —(1 5) D_6 $T_{2\,3}$ G_1 M_2 वत्स्यामि, $G_{2\,3}$ वत्स्याव, M_1 वसाम, M_3 Cg वसाव (for वत्स्याम). T_2 -कालम्, T_3 M_2 -रात्रिम् (for -रात्रम्). ❀ Cr m k वर्षरात्र(Cm k °त्रमिति) जात्येकवचनम्।, Cg. वसाव, लोटुत्तमद्विवचनम्। वर्षरात्रमिति। अच् समासान्त आर्ष। जात्येकवचनम्।,

गिरिशृङ्गमिद रम्यमुत्तम पार्थिवात्मज ।
श्वेताभि कृष्णताम्राभि शिलाभिरुपशोभितम् ।
नानाधातुसमाकीर्ण नदीदर्दुरसयुतम् ।
विविधैर्वृक्षषण्डैश्च चारुचित्रलतायुतम् ।
नानाविहगसघुष्ट मयूररवनादितम् । [10]
मालतीकुन्दगुल्मैश्च सिन्दुवार शिरीषकै ।
कदम्बार्जुनसर्जैश्च पुष्पितैरुपशोभितम् ।
इय च नलिनी रम्या फुल्लपद्मजमण्डिता ।
नातिदूरे गुहाया नौ भविष्यति नृपात्मज ।
प्रागुदक्प्रवणे देशे गुहा साधु भविष्यति । [15]
पश्चाच्चैवोन्नता सौम्य निवातेय भविष्यति ।
गुहाद्वारे च सौमित्रे शिला समतला शुभा ।
श्लक्ष्णा चैवायता चैव भिन्नाञ्जनचयोपमा ।
गिरे शृङ्गमिद तात पश्य चोत्तरत शुभम् ।
भिन्नाञ्जनचयाकारमम्भोधरमिवोत्थितम् । [20]
दक्षिणस्यामपि दिशि स्थित श्वेतमिवापरम् ।
कैलासशिखरप्रख्य नानाधातुविभूषितम् ।
प्राचीनवाहिनीं चैव नदीं भृशमकर्दमाम् ।
गुहाया पूर्वत पश्य त्रिकूटे जाह्नवीमिव ।
चम्पकैस्तिलकै सालैस्तमालैरतिमुक्तकै । [25]
पद्मकै सरलैश्चैव अशोकैश्च शोभिताम् ।
वानीरैस्तिमिशैश्चैव वकुलै केतकैर्धवै ।
हिन्तालैस्तिनिशैर्नीपैर्वेतसै कृतमालकै ।
तीरजै शोभिता भाति नानारूपैस्ततस्तत ।
वसनाभरणोपेता प्रमदेवाभ्यलकृता । [30]
शतश पक्षिसघैश्च नानानादविनादिता ।
एकैकमनुरक्तैश्च चक्रवाकरलकृता ।
पुलिनैरतिरम्यैश्च हससारससेवित ।
प्रहसन्तीव भात्येषा नानारत्नविभूषिता ।
क्वचिन्नीलोत्पलैश्छन्ना भाति रक्तोत्पलै क्वचित् । [35]
क्वचिदाभाति शुक्लैश्च दिव्यै कुमुदकुड्मल ।
पारिप्लवशतैर्जुष्टा बर्हिणक्रौञ्चनादिता ।
रमणीया नदी सौम्या मुनिसघैर्निषेविता ।
पश्य चन्दनवृक्षाणा पङ्क्ती सुरुचिरा इव ।
ककुभाना च दृश्यन्ते मनसैवोदिता समम् । [40]
अहो सुरमणीयोऽय देश शत्रुनिषूदन ।

Ct वर्षरात्र जातावेकवचन वार्षिका मासा इत्यर्थ ❀—(1 6) T2 3 M3 उन्नत (for उत्तम) —G3 om (hapl.) 1 8–12 G2 reads 1 8 after 1 12 —(1 8) D6 वातनिर्झरशोभित, D9 नदिदर्दरसयुत, T G1 2 M2 3 दरीनिर्झ(G1 M2 °निर्द, G2 °दर्द)रशोभित, M1 दरीकदरनिर्झर (for the post half) —(1 9) D8 10 -खण्डैश्, Cv k t as above (for -पण्डैश्) M2 शिला- (for -लता-) D6 9 T G2 M -वृत (for -युतम्) ❀ Cr चित्रलताकृतमित पाठ ❀—(1 10) D6 9 G1 -विहग- (for -विहग) D8 10 -वर- (for -रव-) —D9 om 1 11–12 —(1 11) D6 सिंधुवारैश्च कुर्यक, T1 3 Cv सिंदुवा(T1 °हा)रितकुर्यकै, T2 सिंदुवारैश्च कुर्वकै, G1 M2 सिंदुवारानिरि(M2 °रु)च्यकै, G2 M3 सिंदुवाकुरटकै, M1 बिल्वामलकयूथिते (for the post half) —(1 12) G1 कदम्बार्जुन- (for कदम्बार्जुन-) M1 -वशैश् (for -सजश्) —(1 14) D6 च (for नौ) —(1 17) D9 -सगतला (for समतला) D5 8–10 शिवा (for शुभा) —(1 18) D8–10 कृष्णा (for श्लक्ष्णा) —(1 19) D6 8 G3 M3 Cg गिरि- (for गिरे) M2 इम (for इद) G1 भाति, G2 पश्य (for तात) G2 लक्ष्मण, G3 M3 पश्यनो (for पश्य च) —(1 20) D5 8–10 [उ]दित (for [उ]त्थितम्) —(1 21) D8 10 Ck t [अ]वर, G1 3 M2 [अ]हुद, Cr m g tp as above (for [अ]परम्) ❀ Cr m g अपर शृङ्ग पश्येति पूर्वेण सबन्ध (Cg °णान्वय)।, Ck श्वेतमिवाम्बरमिति पाठ्ग।, Ct श्वेतमिवापरम् इति पाठेऽपरशृङ्ग श्वेतमिव रूप्यमिव स्थितमित्यर्थ ❀—(1 22) D10 -प्रस्थ (for प्रख्य) D5 8 10 -विराजित, D9 G1 -विचित्रित (for -विभूषितम्) —D9 om from 1 23 up to पश्य in 1 24 —(1 24) D5 8 10 पुरत (for पूर्वत) —(1 25) D5 8 9 चदनैस्, D10 वानीरैस् (for चम्पकैस्) D6 T1 3 G2 3 M तालैस्, D10 शालैस (for सालैस्) D9 अविमुक्तकै, D10 इति मुक्तकै (for अति°). —(1 26) Note hiatus between the two halves. G2 पानीरैर्, G3 अकोलैश् (for अशोकैश्) G2 वकुलैस्तथा (for चेव शोभिताम्) —(1 27) D6 9 M1 नीवारैस्, G2 अशोकैर् (for वानीरैस्) D8 10 तिमिदैश्, D9 तिमिरैश्, G2 वचुलैश् (for तिमिशैश्) G1 3 M1 वचुले, G2 नीवारै (for वकुले) D5 8–10 अपि (for धव) ❀ Cv r वकुलेरि(Cr °ल इ)ति सम्यक् ❀—(1 28) D5 8–10 T2 G3 M1 Cg तिमिशैर्, D6 G1 2 अर्जुनैर्, T3 तरलैर्, M2 3 तिरिटैर् (for तिनिशैर्) D6 T G1 M2 3 Cv r g वेत्रक, G2 3 तिरिट (for वेतसे) ❀ Cv r g वेत्रकरिति सम्यक् ❀—After 1 28, G3 reads 1 33 for the first time repeating it below —(1 29) D9 om (hapl.) second तत —(1 30) G1 3 M1 सलकृता, Ck as above (for [अ]भ्य°) —(1 31) T2 3 नानानिनदनादिता, M3 नानानादविनोदिता (for the post half) —(1 32) G3 एकमेव (for एकैकम्) ❀ Cv r एकैकमनुरक्तैरि(Cr °श्चै)ति सम्यक् ❀—(1 33) D6 8–10 -सेविता (for -सेविते) G3 (second time) वचुलैर्जलकुर्कुट (for the post half) —(1 34) D5 8–10 T3 [ए]व (for [इ]व). T M3 नारी सर्व- (for नानारत्न) D5 8–10 समन्विता (for -विभूषिता) —(1 35) D6 G2 M2 3 नीलोत्पल- (for °लैश्). —(1 36) D9 कुसुम- (for कुमुद-) G1 -मडलै (for -कुड्मलै) —(1 37) D5 परिप्लवशतैर् T जुष्टा (for जुष्टा). D5 8–10 बर्हिक्रौचविनादिता (for the post half) —(1 38) T1 G M1 3 सौम्य (for सौम्या) D5 8–10 G2 -सघ- (for -सघैर्) —(1 39) D9 reads from वृक्षाणा up to 1 41 in marg D6 पुञ्ज, G1 पती (for पङ्क्ती) D6 T1 3 G1 M2 3 Cv r g सुरचिता, Ck t as above (for सुरुचिरा) G3 भुवि (for इव) ❀ Cv r सुरचिता इवेति सम्यक्, Ck t इव इवोऽप्यर्थ(Cr °शब्दोऽप्यर्थ) ❀—(1 40) T2 G1 2 M Cv r m g [इ]व (for [ए]व) M1 [उ]दितै (for [उ]दिता·). G3 मनसा निर्मिता इव (for the post half).

Arya Research Team

दृढ रस्याव सौमित्रे साध्वत्र निवसावहे ।
इतश्च नातिदूरे सा किष्किन्धा चित्रकानना ।
सुग्रीवस्य पुरी रम्या भविष्यति नृपात्मज ।
गीतवादित्रनिर्घोष श्रयते जयता वर । [45]
नर्दता वानराणा च मृदङ्गाडम्बर महत् ।
लब्ध्वा भार्यां कपिवर प्राप्य राज्य सुहृद्वृत ।
सुख नन्दति सुग्रीव सम्प्राप्य महतीं श्रियम् ।

16

After 4 29 27, B4 D5 6 8–10 G1 M2 Ck t ins, D3 T (T1 first time) G2 3 M3 Cv r m g ins after 4 29 28, D11 ins 1 1–16 after 1 5 of 579* and 1 17–116 after 4 29 28, while M1 ins 1 1–36 and 1 37–116 after st 27 and 28 respv

शाखासु सप्तच्छदपादपाना
प्रभासु तारार्कनिशाकराणाम् ।
लीलासु चेवोत्तमवारणाना
श्रिय विभज्याद्य शरत्प्रवृत्ता ।
सम्प्रत्यनेकाश्रयचित्रशोभा [5]
लक्ष्मी शरत्कालगुणोपनीता ।
सूर्याग्रहस्तप्रतिबोधितेषु
पद्माकरेष्वभ्यधिक विभाति ।
सप्तच्छदाना कुसुमोपगन्धी
षट्पादवृन्दैरनुगीयमान । [10]
मत्तद्विपाना पवनोऽनुमार्गी
दर्प वनेष्वभ्यधिक करोति ।
अभ्यागतश्चारुविशालपक्षे
सर प्रियें पद्मरजोऽवकीर्णे ।
महानदीना पुलिनोपयातै [15]
क्रीडन्ति हसा सह चक्रवाकै ।
मदप्रगल्भेषु च वारणेषु
गवा समूहेषु च दर्पितेषु ।
प्रसन्नतोयासु च निम्नगासु
विभाति लक्ष्मीर्बहुधा विभक्ता । [20]
नभ समीक्ष्याम्बुधरैर्विमुक्त
विमुक्तवर्हाभरणा वनेषु ।
प्रियाम्बसक्ता विनिवृत्तशोभा
गतोत्सवा ध्यानपरा मयूरा ।
मनोज्ञगन्धे प्रियकेरनर्पे [25]
पुष्पातिभारावनताग्रशाखै ।
सुवर्णगौरैर्नयनाभिरामै-
रुद्योतितानीव वनान्तराणि ।
प्रियान्विताना नलिनीप्रियाणा
वने रताना कुसुमोद्गतानाम् । [30]
मदोत्कटाना मदलालसाना
गजोत्तमाना गतयोऽद्य मन्दा ।
व्यभ्र नभ शस्त्रविधौतवर्ण
कृशप्रवाहानि नदीजलानि ।

Arya Research Team

ॐ Cr मनसेवोपपादिता । सम मनसा सकल्पेन सम यथा भवति तथा उपपादिता उत्थिता इव ।, Ct मनसा सकल्पेन सममेवोदिता ॐ —(1 42) G3 इद (for दृढ) G1 रस्यामि, M1 रस्याम, Cg as above (for रस्याव) M3 सर्वत्र (for साध्वत्र) D8 10 G1 M1 2 निवसामहे, Cg °वहे (for °वहे) —(1 45) D9 वर, D10 वर (for वर) —(1 46) D5,8–10 नदतां, Cr m g as above (for नर्दता) M1 वानरेंद्राणा (for °राणा च) —(1 48) D9 सशास्य (for सम्प्राप्य) —After 1 48, G3 ins

एवमुक्त्वा महातेजा लक्ष्मण शुभलक्षणम् ।

16

(1 3) B4 गौर- (for चेव) —(1 4) B4 वितत्य (for विभज्य) —(1 5) B4 -रूपा (for -शोभा) —(1 6) D5 8–10 -[उ]पपन्ना (for °गीता) —(1 7) D6 Cg -[अ]ग्रहस्ते, T3 M3 -[अ]ग्रपाट-, M2 -[अ]ग्ररश्मि (for °हस्त) —(1 8) D5 6 G3 [अ]पि (for [अ]भि-) —(1 9) B4 -[उ]पपन्न (for °गन्धी) —(1 10) G1 -सृष्टैर् (for -वृन्दैर्) D3 11 अनुगम्यमान —(1 12) D8–10 Ct दर्प विनेष्यन्न (D9 °त्य)धिक विभाति —(1 13) G1 M2 अभ्यागताश्, Cg k t अभ्यागतेश् (as above). —(1 14) B4 M1 शरत्प्रियै, D3 सह प्रियै, D8–11 सरप्रियै (for सर प्रिय) G1 3 -विकीर्ण (for -ऽवकीर्ण) —(1 15) B4 विमलोपगधे, D3 6 10 11 पुलिनोपपातै (for °पयातै) —(1 17) B4 मदप्रनष्टेषु, D10 महाप्रगल्भेषु (for मद°) T [अ]पि (for च) —(1 18) B4 D3 सहस्रेषु (for समूहेषु) —(1 20) D6 विपिक्ता (for विभक्ता) —(1 22) D3 विद्रु-, D8 marg, G2 निर्मुक्त- (for विमुक्त-) D11 ननेषु (meta) (for वनेषु) —(1 23) B4 क्रियाविमुक्ता, D3 6 प्रियासक्तशक्ता, D8–11 Ck t °स्वक्ता (for °न्वसक्ता) M1 प्रियासु मक्ता मुनिवृत्तभोगा —(1 24) M1 हत- (for गत-) —(1 25) D3,11 -रूपै (for -गन्धे) —(1 26) B4 -[अ]मिभार-, D3 8–11 -[अ]ग्रभार, D5 -[उ]पहार, T2 -[अ]वभार- (for -[अ]ति°) —(1 28) G1 विद्योतितानि (for उद्यो°) —(1 29) D3 11 करिणी- (for नलिनी-) —(1 30) D5 वने प्रियाणा, D8–10 वनप्रियाणा (for वने रताना) D3 11 M2 सुकुलोद्भवाना, T1(before corr) 2 M1 3 Cr*p* m g कुसुमोद्धताना, T3 °स्थिताना, G2 3 Cv r स्व(G3 Cv r नु)कुलोद्भ°, Cv*p* k t as above (for कुसुमोद्गतानाम्) ॐ Cv सुकुलोद्भवानामरावतादिकुलजातानाम् । कुसुमोद्धतानामिति पाठे सप्तच्छदकुसुमान्यभिप्रेतानि ।, Cr सुकुलोद्भवानामैरावतादिकुलजातानाम् । कुसुमोद्धतानामिति पाठे सप्तच्छदकुसुमाघ्राणनमत्तानाम् ।, Cm g कुसुमोद्धताना सप्तच्छदकुसुमाघ्राणेन मत्तानाम् ।, Ck कुसुमोद्गताना कुसुमाघ्राणप्रवृत्तानाम् । कुसुमोद्गतानामिति पाठ ।, Ct कुसुमोद्गतानां सप्तच्छदकुसुमाघ्राणप्रवृत्तानाम् । "उद्गतानाम्" इत्येव पाठ पाठ । "उद्धतानाम्" इति कल्पित इति कनकछन ॐ —(1 31) D10 महोत्कटाना. D3 11 प्रिय- (for मद-) —(1 32) D3 11 विभाति (for ऽद्य मन्दा) —(1 33) D5 8–10 व्यक्त (for व्यभ्र) B4 शमुसुधौत-, D3 11 शस्त्रसुधौत, D5 6 शस्त्रविधूत- (for

कह्लारशीता पवना प्रवान्ति [35]
तमोविमुक्ताश्च दिश प्रकाशा ।
सूर्यातपक्रामणनष्टपङ्का
भूमिश्चिरोद्घाटितसान्द्ररेणु ।
अन्योन्यवैरेण समायुतानाम्
मुद्योगकालोऽद्य नराधिपानाम् । [40]
शरद्गुणाप्यायितरूपशोभा
प्रहर्षिता पासुमुक्षिताङ्गा ।
मदोत्कटा सप्रति युद्धलुब्धा
वृषा गवा मध्यगता नदन्ति ।
समन्मथ तीव्रतरानुरागा [45]
कुलान्विता मन्दगति करिण्य ।
मदान्वित सपरिवार्य यान्त
वनेषु भर्तारमनुप्रयान्ति ।
त्यक्त्वा वराण्यात्मविभूषणानि
वर्हाणि तीरोपगता नदीनाम् । [50]

निर्भर्त्स्यमाना इव सारसौघै
प्रयान्ति दीना विमदा मयूरा ।
विन्यस्य कारण्डवचक्रवाका-
न्महारवैर्भिन्नकटा गजेन्द्रा ।
सर सु वद्धाम्बुजभूषणेषु [55]
विक्षोभ्य विक्षोभ्य जल पिबन्ति ।
व्यपेतपङ्कासु सवालुकासु
प्रसन्नतोयासु सगोकुलासु ।
ससारसारावविनादितासु
नदीषु हृष्टा निपतन्ति हसा । [60]
नदीघनप्रस्रवणोदकाना-
मतिप्रवृद्धानिलबर्हिणानाम् ।
प्लवगमाना च गतोत्सवाना
द्रुत रवा सप्रति सप्रनष्टा ।
अनेकवर्णा सुविनष्टकाया [65]
नवोदितेष्वम्बुधरेषु नष्टा ।

शखवि°) —(1 34) B4 काशप्रवाहीनि, D3 काल्यप्रवाहानि, T2 M3 कून° (for कुश°) —After 1 34, B4 D3 11 ins

समावकाशेषु रथा निमुक्ता
नानास्त्रयोग्या भुवि शस्त्रवन्त ।

[(1 1) D3 -[अ]वकाशेन (for °काशेषु) B4 -[अ]भि- (for नि) —(1 2) D3 -योग्यासु च (for -योग्या भुवि) B4 वशशस्त्रवृत्ते (for भुवि शस्त्रवन्त)]

—B4 D3 11 om 1 35–36 —(1 36) T1 2 M2 -विमुक्ताश् (for -विमु°) —(1 37) D3 11 सूर्यांशुतप्ताप्सु विनष्टपका —(1 38) D3 11 अथोद्घाटित, Γ G1 M2 3 समुत्पादि(T3 °ति)त-, G2 समुत्पाटित-, G3 स्थिरोद्घाटित-, M1 चिरोत्पादित- (for चिरोद्घाटित) B4 भूमेरथोत्पाटितमाद्ररेखा ❀ Cr m "समुत्सा (Cr °त्पा)दितसान्द्ररेणु" इति पाठ ❀ —(1 39) B4 अन्योन्यवैरादपसर्पितानाम्, D3 11 °वैरैर(D3 °ै)भिर्मर्पितानाम्, D6 T1 2 G2 M Cv r g °वैरामर्षायुतानाम्, T3 °वैरामरुषायुतानाम्, G1 °वैरेण रुषायुतानाम्, G3 °वैरामदविह्वलानाम्, K(ed) °वैरातिरुषायुतानाम् ❀ Cv अन्योन्यवैरामर्षयुतानामित्यत्र वृत्तभङ्गपरिहाराय रेफस्य स्थाने वर्णक्रकार पठ्यते ।, Cr g अन्योन्यवैरामर्षयुतानामित्यत्र वृत्तभङ्ग आर्ष । वैर विरोध, अमर्षोऽसहिष्णुता, ताभ्यामायुतानामासमन्ताद्युताना वैरामर्षपूर्णनामित्यर्थ । (Cr यद्वा वृत्तभङ्गपरिहारायान्योन्यवैरामर्षयुतानामिति स्वमारे[°स्थाने ?] सवर्णक्रकार पठ्यते ।), Ck अमक्रपेनि छन्दोभङ्गपरिहाय पाठ ❀ —(1 40) M2 [ऽ]त्र (for ऽद्य) —(1 42) B4 पाडु, D3 6 10 11 पाशु- (for पासु-) D5 8–10 G3 M1 समुत्थिताग्रा —(1 43) B4 वलोत्कटा सप्रति लब्धयुद्धा —(1 45) D3 11 G3 समन्मथास्, D8–10 G2 समन्मथा, Cg as above (for °न्मथ) M1 3 तीव्रगत- (for °नर-) D5 8–10 -[अ]नुरागा M2 समन्मथा तीव्रतरानुरागा —(1 46) T1 कुलान्वित, M2 त्वरान्विता (for कुलान्विता). G3 मदगता (for °गति) T G1 करेण्व, M2 करेणु. B4 कुलान्वित मदगत करेण्व, D3 11 कुलान्वित(D11 °ता) मत्तगज करिण्य, D8–10 Ck t °ता मदगति करेणू ❀ Ck करेणूरित्यूकारान्तत्व छान्दसम्।, Ct करेणूरिति दीर्घत्वमार्षम् ❀ —(1 47) B4 D3 मत्तालस, G2 मुदान्वित (for मदा°) D3 11 मत्त (for यान्त) —(1 48) D3 11 अनुव्रजति, D8–10 M2 अनुप्रयाति, G2 अभिप्रयाति —(1 49) D5 8 10 -विभूषितानि (for -विभूषणानि) —(1 51) B4 विभर्त्स्यमाना —(1 52) B4 ध्यायति (for प्रयान्ति) D3 8–10 Ct विमना, D11 मविदा (meta) (for विमदा) ❀ Ct विमना मयूरा । मन पर्यायो मनशब्दोऽकारान्तोऽपि द्विरूपकोशात् ❀ —(1 55) D5 जुष्टाबुज-, D8–10 G1 M2 Ck t बुद्धाबुज, G2 फुल्ला° (for बद्धाम्बुज) B4 D3 11 सर सु फुल्लाबुजभूषि(B4 °र्षि)तेषु —(1 56) D3 om (hapl) first विक्षोभ्य D3 विलोभ्य, D8 marg (for second विक्षोभ्य) —(1 57) D9 सु- (for स-) —(1 58) B4 D3 11 सगाकुलासु (for सगो°) —(1 59) D3 सु- (for स) B4 D9 G2 M1 3 -निनादितासु (for -विना°) D5 ससारसा + वलिनादितासु ❀ Cv r सारसारावविनादितासु सारसाश्च तेषामारावविनादिताश्चेति सारसारावविनादितास्तासु। नादितमित्यन्तर्णयन्ताद्भावे निष्ठा। तस्य बहुव्रीहिर्वा । ससारसा । रावविनादितास्विति वा पदच्छेद ।, Cm समारसारावविनादितासु समारसाश्च तेषामारावविनादिताश्चेति तथा तासु । यद्वा ससारसा, रावविनादितास्विति च्छेद ।, Cg समारसा इति पदच्छेद । रावविनादितासु निजशब्देन सञ्जातशब्दासु।, Ck समारसानामारावजनितविनादितमहिता समारसारावविनादिता ।, Ct ससारसाश्च तास्तदारावविनादिताश्च तासु ❀ —(1 60) D3 11 विन-ति (for निपतन्ति) D5 8–10 transp हृष्टा and हसा —(1 61) B4 शरद्घन-, D3 11 नदीनद- (for नदीघन-) M1 -प्रावरण- (for -प्रस्रवण-) —(1 62) G1 -प्रविद्ध- (for -प्रवृद्ध-) —(1 63) D6 om च —(1 64) D5 8–10 T1 ध्रुव (for द्रुत) D6 T1 3 G M1 3 सप्रणष्टा B4 अन्योन्यरागा शरदि प्रनष्टा. —(1 65) D5 11 M2 सुनिविष्ट-, Γ सुविमृष्ट- (for सुविनष्ट-) B4 सचक्रवाका कलहससुष्टा, D3 अनेकवर्णं सुविनिष्टकाया, —(1 66) B1 D3 11 नवोदकोद्वेजितविप्रन(B4 °नप्रह)ष्टा.

Arya Research Team

क्षुधार्दिता घोरविषा विलेभ्य-
श्चिरोषिता विप्रसरन्ति सर्पा ।
रात्रि शशाङ्कोदितसौम्यवक्त्रा
तारागणोन्मीलितचारुनेत्रा । [70]
ज्योत्स्नाशुकप्रावरणा विभाति
नारीव शुक्लाशुकसंवृताङ्गी ।
विपक्वशालिप्रसवानि भुक्त्वा
प्रहर्षिता सारसचारुपङ्क्ति ।
नभ समाक्रामति शीघ्रवेगा [75]
वातावधूता ग्रथितेव माला ।
सुप्तैकहंस कुमुदैरुपेत
महाह्रदस्थ सलिल विभाति ।
घनैर्विमुक्त निशि पूर्णचन्द्र
तारागणाकीर्णमिवान्तरिक्षम् । [80]
प्रकीर्णहंसाकुलमेखलाना
प्रबुद्धपद्मोत्पलमालिनीनाम् ।
वाप्युत्तमानामधिकाम्र लक्ष्मी-
र्वैराङ्गनानामिव भूषितानाम् ।
वेणुस्वनव्यञ्जिततूर्यमिश्र [85]
प्रत्यूषकालेऽनिलसंप्रवृत्त ।
समूर्छितो गर्गरगोवृषाणा-
मन्योन्यमापूरयतीव शब्द ।
नवैर्नदीना कुसुमप्रहासं
व्यपोह्यमानं मृदुमारुतेन । [90]
धौतामलश्लक्ष्णपटप्रकाशा
कूलानि काशैरुपशोभितानि ।
वनप्रचण्डा मधुपानताम्रा
प्रियान्विता षट्चरणा प्रहृष्टा ।
वनेषु मत्ता पवनानुयात्रा [95]
कुर्वन्ति पद्मानिलरेणुगौरा ।
जल प्रसन्न कुमुदप्रहास
क्रौञ्चस्वन शालिवन विपक्वम् ।

—(1 67) M1 घोषविषा (for घोर°) —(1 68) D5 8 [अ]विप्रसरन्ति (for विप्र°) B4 सरोषिता विप्रविशति सर्पा —After 1 68, D8–10 G2(before 1 1) M2(*inf lin sec m*) 3 Cm g k t ins.

चञ्चच्चन्द्रवरस्पर्शोन्मीलितताराका ।
अहो रागवती संध्या जहाति स्वयमम्बरम् ।

[(1 1) M2 शरच्- (for चञ्चच्-) and -लोचना (for -तारका) —(1 2) D8 G2 जहात्यु, Cg.k as above (for जहाति)] —(1 69) D2 रात्रि शशाङ्कोद्यतसौम्यवक्त्रा ❀ Cv r m g शशाङ्कोदितसौम्यवक्त्रा उदितशशाङ्कसौ(Cg °र)म्यवक्त्रा ।, Ck t शशाङ्कोन्निनि । उदितशशाङ्केत्यर्थ ❀ —(1 70) D2 11 शरद्गुण (for तारागण) D11 -पद्मनेत्रा —(1 71) D6 -[अ]कुर- (for -[अ]शुक्र) —(1 72) B4 om शुक्ला —(1 74) B4 -सारपक्ति (for -चारु°) —(1. 75) D6 M1 तीव्र- (for शीघ्र-) —(1 76) B4 [अ]म्य (for [इ]व) —(1 77) G3 सुप्तेहकस (meta) B4 G2 कुमुदैर्, D10 मुकुंदैर् (meta) (for कुमुदर्) D11 युत च (for उपेत) —(1 78) D2 11 -सर स्य (for ह्रदस्थ) —(1 79) B4 D2 11 मेघैर् (for घनैर्) B4 वियुक्त (for विमुक्त) —(1 81) B4 पानीय, D2 11 प्रमत्त (for प्रकीर्ण-) —(1 82) D2 11 विबुद्ध- (for प्रबुद्ध) —(1 85) B4 -ध्वनि, T -स्वर-, G2 -स्वनो (for -स्वन-) D2 -पूर्णकट, D5 -मागमिश्र (for -तूर्यमिश्र) —(1. 86) B4 M2 -काल (for -काले) B4 D6 G2 Ck [s]निलमप्रवृद्ध, D2 स्वरसविरुद्ध, D11 स्वरसविवृद्ध (for °सप्रवृत्त) —(1 87) D8 10 Ck tp गहर, Cv m g as above (for गर्गर-) B4 समूर्छिते सागरगोवृषाणाम्, D2 11 समूर्छित केकिरवानुनिद्धो, D5 9 समूर्छितो मूर्छित(D9 कीचक)गोवृषाणाम् ❀ Cv गर्गर-गोवृषाणा दधिमन्थनभाण्टाना गोवृषाणामृषभाणा च शब्दोऽन्योन्यमापूरयतीव गर्गरशब्दो(°ब्द ?) गोवृषशब्दो वर्धयतीव । त च स । प्रत्यूषकाले प्रबुद्धा गोवा(पा)ला गोष्ठेषु वेणुवाद्य वादयन्ति, गोष्यो गर्गरांश्च मथ्नन्ति, गोवृषाश्च नर्दन्ति । तत्र समुत्थित शब्द पवनेन प्रवृत्त इत्यर्थ ।, Cr गर्गर-गोवृषाणा गर्गराणा दधिमथनभाण्टाना, गोवृषाणा च शब्द । अन्योन्य-मापूरयतीव । गर्गरशब्द गोवृषशब्दो वर्धयतीव । त च स । प्रत्यूषकाले प्रबुद्धा गोपाला गोष्ठेषु वेणुवाद्यानि कुर्वन्ति । गोष्यो गर्गराश्च मथ्नन्ति । गोवृषाश्च नर्दन्ति । तत्र समुत्थितशब्द पवनेन प्रथित इत्यर्थ ।, Cm गर्गरगोवृषाणा गर्गराणा दधिमन्थनभाण्टाना गोवृषाणा वृषभाणा च शब्दो-ऽन्योन्यमापूरयतीव, प्रत्यूषकाले प्रबुद्धा गोपा गोष्ठेषु वेणुवाद्यानि वादयन्ति, गोष्यो गर्गराश्च मथ्नन्ति, गोवृषाश्च नर्दन्ति । तत्र समुदितशब्द पवनेन प्रथित इत्यर्थ । गर्गरीशब्दस्य दीर्घभावश्छान्दस । "गर्गरी मन्थनी भाण्डी पुमान्मत्स्यविशेषके" इति निघण्टु ।, Cg गर्गरगोवृषाणा, गर्गराणा दधिमथनभाण्डाना गवा वृषाणा च शब्द । अन्योन्यमापूरयतीव परस्परम-भिवर्धयतीव । प्रात कालिकदधिमथनक्षोभो वत्सोत्सुकाना गवा पुष्ट्या कामा तुराणा वृषाणा च शब्दो गोपालवेणुस्वन प्राभातिकवायुमिश्रोऽपि वृद्धो जायत इत्यर्थ ।, Ck गहराणा गिरिगह्वराणा गोवृषाणा वनवर्त्तिनामिति शेष । गावो वृषाश्च तथा तेषा शब्दोऽन्योन्यमापूरयतीव वर्धयतीव । कीचकध्वन्यु-पेतगह्वरशब्दो गोशब्दोपेतवृषशब्दश्चान्योन्य वर्धयतीव । साजात्यादित्यर्थ । गह्वरगोवृषाणामिति पाठ्य ।, Ct गहराणा गिरिगह्वराणा गोवृषाणा च वनवर्तिना शब्दोऽन्योन्यमापूरयतीव वर्धयतीव । गह्वरगोवृषशब्दा साजात्या-त्परस्परवर्धका इत्यर्थ । "गह्वरगोवृषाणाम्" इति पाठ ❀ —(1 89) B4 -प्रवाहैर्, D6 T1 G M1 3 Cv r m g k -प्रभासैर्, Ct as above (for -प्रहासैर्) —(1 90) B4 मृदुनानिलेन (for मृदुमारुतेन) —(1 93) B4 मद-, D6 वने, T2 शनै, T3 नव- (meta) (for वन) —(1 95) B4 पवनानुयाता, D3 11 °सारात् (for °यात्रा) —(1 96) B4 प्रयाति, D3 11 भ्रमति (for कुर्वन्ति) B4 पद्मानिल, D3 11 पद्माकर-, D5 पद्मानन- (for पद्मानन-) —(1 97) D6 T2 3 जल- (for जल). B4 D8–11 G2 कुमुम-(G2 °म), D3 M2 3 कुमुद (for कुमुद-) D3 सहास, D5 6 G1 M1 3 Cg k -प्रभास, T2 3 G3 -प्रहास, Ct as above (for -प्रहास) ❀ Cg प्रभासत इति प्रभासम्। पचाद्यच्।, Ck कुमुदरूप प्रभासो यस्य जलस्य तत्तथा।, Ct कुमुमरूप प्रहासो यस्य तम् ❀ —(1 98) B4 D3 G1 M2 3 क्रौंचस्वन. G3 च पक्व (for विप°) —(1 99) G2 मदश्

Anna Research Team

मृदुश्च वायुर्विमलश्च चन्द्र
शसन्ति वर्षव्यपनीतकालम्। [100]
मीनोपसदर्शितमेखलाना
नदीवधूना गतयोऽद्य मन्दा।
कान्तोपभुक्तालसगामिनीना
प्रभातकालेष्विव कामिनीनाम्।
सचक्रवाकानि सशैवलानि [105]
काशैर्दुकूलैरिव सवृतानि।
सपत्रलेखाणि सरोचनानि
वधूमुखानीव नदीमुखानि।
प्रफुल्लबाणासनचित्रितेषु
प्रहृष्टषट्पादनिकूजितेषु। [110]
गृहीतचापोद्यतचण्डदण्ड
प्रचण्डचारोऽद्य वनेषु काम।
लोक सुवृष्ट्या परितोषयित्वा
नदीस्तटाकानि च पूरयित्वा।
निष्पन्नसस्या वसुधा च कृत्वा [115]
त्यक्त्वा नभस्तोयधरा प्रनष्टा।

17

After 4 32 24, B4 D5 6 8–10 S ins

कूजित नूपुराणा च काञ्चीना नि स्वन तथा।
स निशम्य तत श्रीमान्सौमित्रिरलज्जितोऽभवत्।
रोषवेगप्रकुपित श्रुत्वा चाभरणस्वनम्।
चकार ज्यास्वन वीरो दिश शब्देन पूरयन्।
चारित्रेण महाबाहुरपकृष्ट स लक्ष्मण। [5]
तस्थावेकान्तमाश्रित्य रामशोकसमन्वित।
तेन चापस्वनेनाथ सुग्रीव प्लवगाधिप।
विज्ञायागमन त्रस्त स चचाल वरासनात्।
अङ्गदेन यथा मह्य पुरस्तात्प्रतिवेदितम्।
सुव्यक्तमेष सप्राप्त सौमित्रिर्भ्रातृवत्सल। [10]
अङ्गदेन समाख्यातो ज्यास्वनेन च वानर।

(for मृदुश्) —(l 100) B4 वर्षाभ्युपयान, D3 11 वर्षाव्यपयात (D11 °न), D8 वर्षे व्यपनीत, D9 वर्षाव्यप°, D10 Cvp वर्ष व्यप°, M2 वर्षव्यपनीति- (for वर्षव्यपनीत-) —(l 101) B4 पीडोपससर्पितमेखलाना, D3 11 मीनावलीदर्शितमेखलाना —(l 102) D6 गतीना (for -वधूना) —(l 103) D3 11 -प्रमुक्त- (for [उ]पमुक्त-) M1 -कामिनीना (for -गामि°) —(l 104) M1 प्रत्यूष- (for प्रभात-). D3 मानिनीना (for कामि°) —(l 107) T1 3 G3 M1 3 Cg -लेखानि, Cv m k t as above (for रेखाणि) D3 11 सकुड्मं(D11 °कुञ्ज)लोन्मीलितलोचनानि —(l 108) G3 सरो- (for नदी) —(l 111) G3 -द्रुत- (for -[उ]द्यत) B4 D8 दडचड (by transp), D3 11 -चारुवाण, D5 चटवेग, M1 चडदडै (for -चण्डदण्ड) ❀ Cv r गृहीतचापोद्यतचण्डदण्ड। गृहीतचापश्चोद्यतचण्डदण्डश्च। दण्ड शरविशेष। तिरि(Cr तरि)कर्षण(तीर्गतद्वल)दण्डासनाद्य काण्टभेदना स्युरिति हलायुध। अथवा गृहीतेन चापेनोद्यत प्रयुक्त दण्डन येन स तथोक्त इति वा।, Cm गृहीतचापोद्यतचण्डदण्ड, गृहीतचापश्चासावुद्यतचण्डदण्डश्च। दण्ड शरविशेष। यद्वा गृहीतचापेनोद्यत प्रयुक्तश्चण्डदण्डस्तीक्ष्णदण्डन येन स तथोक्त।, Ck गृहीतचापश्चोद्यते विरहिविषयके दण्डे प्रचण्ड प्रगल्भस्तथा।, Ct गृहीतेन चापेनोद्यते आरब्धे विरहिविषयके दण्डे चण्ड प्रचण्ड ❀—(l. 112) D5 8–10 G1 Ct -चापो, Cg as above (for -चारो) ❀ Ct प्रचण्डश्चापो यस्य स। इद हेतुगर्भम् ❀ —After l 112, D3 11 ins

सगोकुलाना वृषभोत्तमानां
प्रत्यूषकाले।त्थितहर्षितानाम्।
हभारवोन्मिश्रितनर्दितानि
वनेषु काल्याभ्यधिक विभान्ति।

[(l 2) D3 प्रसुप्त- (for प्रत्यूष-) —(l 3) D3 मिभारवोन्मिश्रित-]

—(l 113) D3 लोकेषु वृष्ट्या, D6 लोक स्ववृष्ट्या, D11 लोकास्तु वृष्ट्या (for लोक सुवृष्ट्या) —(l 114) B4 D3 11 नद्री(D11 °द्य)स्तडागानि, G3 नदीस्तटाकानि (for नदी°) —(l 115) D5 6 निष्पक्व- (for निष्पन्न-) —(l 116) B4 G1 प्रयाता, D5 T1 2 G2 3 M1 प्रणष्टा (for प्रनष्टा) —Thereafter D3 reads colophon with *Sarga name* शरद्वर्णन and *Sarga no* 30

17

B4 om l 1–5 —(l 1) M2 शिंजित (for कूजित) G1 क्रौंचीना (for काञ्चीना) D5 8–10 T2 G1 2 M1 2 निस्वन, T1 3 M3 निनद (for नि स्वन) M1 तदा G3 निनदानि च —(l 2) G3 तन्, K(ed) स- (for स) ❀ Cm लज्जितोऽभवत्, अन्य पुरदर्शनादिति भाव।, Cg लज्जितोऽभवत्, उपरिसुरतद्योतकत्वादिति भाव।, Ck सौमित्रिरज्जितोऽभवदिति। असदयोध्यायामप्येव सौभाग्य नास्ति। राजामप्यस्माकमिति लज्जा।, Ct लज्जितोऽभवत्। अयोध्यातोऽप्यधिकसौभाग्यदर्शनाल्लज्जा। परस्त्रीदर्शनकृता लज्जेत्यन्ये ❀ —(l 3) D5 G2 -प्रचलित T2 -प्रवृद्धस्तु, G3 -प्रकटित (for -प्रकुपित) G2 श्रुत्वाभरणनिस्वन (for the post half) ❀ Cr m रोषवेगप्रकुपितो रोषवेगेन प्रवृद्ध।, Cg रोषवेगप्रकुपितो रोषवेगप्रवृद्ध। प्रकोपशब्दो ह्यभिवृद्धवाची।, Ct रोषवेगेन प्रकुपितो नेदानीमपि कामभोग त्यजतीति कोपवृद्धि। "रोषवेगप्रचलित" इति पाठान्तरम्। अथवस्तुल्य ❀ —(l 5) D5 अवकृष्ट (for अप°) —(l 6) B4 आस्थाय (for आश्रित्य) B4 रोषवेग-, D6 M3 Cg k(within brackets) रामशोक-, Cr m k t as above (for °कोप-) D5 -समर्पित (for °न्वित) —D10 reads wrongly l 7 and 8 after l 13 —(l 7) B4 [अ]स्य (for [अ]थ) —(l 8) T2 गमन (for [आ]गमन) B4 T1 3 G2 M Cg स- (for स) —(l 9) B4 G2 प्रतिपादित, M1 विनि° (for प्रतिवेदितम्) —(l 10) M2 सभ्रात (for सप्राप्त) B4 मित्र (for भ्रातृ) —B4 om l 11–12 —(l 11) T1 3 M3 Ck समाख्यान (for °तो) —(l. 12) D6 T2 M2 [उ]पशुष्यति, T1 3 G1 M3 व्यशुष्यत, M1 [अ]प्यशुष्यत (for [उ]पशुष्यत) ❀ Ct उपशुष्यतोपाशु-

बुबुधे लक्ष्मण प्राप्त मुरा चारयोपशुष्यत ।
ततस्तारा हरिश्रेष्ठ सुग्रीव प्रियदर्शनाम् ।
उवाच हितमव्यग्रश्लाससभ्रान्तमानस ।
किं नु तत्कारण सुभ्रु प्रकृत्या मृदुमानस । [15]
सरोष इव सम्प्राप्तो येनाय रावणानुज ।
किं पश्यसि कुमारस्य रोषस्थानमनिन्दिते ।
न खल्वकारणे कोपमाहरेन्नरसत्तम ।
यद्यस्य कृतमस्माभिर्दुष्यसे किंचिदप्रियम् ।
तद्रुद्धया सम्प्रधार्याशु क्षिप्रमर्हसि भाषितुम् । [20]
अथवा स्वयमेवैन द्रष्टुमर्हसि भामिनि ।
वचन मान्वयुक्तञ्च प्रसादयितुमर्हसि ।
त्वद्दर्शनविशुद्धात्मा न स कोप करिष्यति ।
न हि स्त्रीषु महात्मान क्वचित्कुर्वन्ति दारुणम् ।
त्वया सान्त्वरूपक्रान्त प्रसादेन्द्रियमानसम् । [25]
तत कमलपत्राक्ष द्रक्ष्यास्यहमरिंदमम् ।
सा प्रस्खलन्ती मदविह्वलाक्षी
प्रलम्बकाञ्चीगुणहेमसूत्रा ।
सलक्षणा लक्ष्मणसन्निधान
जगाम तारा नमिताग्रयष्टि । [30]

स ना समीक्ष्येव हरीशपत्नीं
तस्थावुदार्मानतया महात्मा ।
अवाङ्मुखोऽभून्मनुजेन्द्रपुत्र
स्त्रीसन्निकर्षादिति लक्ष्मणोऽभूत् ।
सा पानयोगाद्ध निवृत्तलज्जा [35]
दृष्टिप्रसादाच्च नरेन्द्रसूनो ।
उवाच तारा प्रणयप्रगल्भ
वाक्य महार्थं परिमान्वयूर्णम् ।
किं कोपमूल मनुजेन्द्रपुत्र
कस्ते न तिष्ठति वाक्यनिर्देशे । [40]
क शुष्कवृक्ष वनमापतन्तं
दवाग्निमासीदति निर्विशङ्क ।
स तस्या वचन पुनरा सान्त्वपूर्वमभाषित ।
भूय प्रणयदृष्टार्थं लक्ष्मणो वाक्यमब्रवीत् ।
किमत्र कामवृत्तस्ते लुब्धस्यार्थैकसङ्ग्रह । [45]
भर्ता भर्तृहिते युक्ते न चैनमनुवर्त्यसे ।
न चिन्तयति राज्यार्थं नात्मानोकपरायणम् ।
सामात्यपरिपत्तारे पानमेवोपसेवते ।
स मामाश्रमुर कृत्वा प्रमाण प्लवगेश्वर ।

प्यत ॐ —(1 13) G1 प्रियदर्शन. —(1 14) B4 परम् (for हितम्) B4 -सरक्तलोचन (for -सभ्रान्तमानस) —B4 om 1 15 —(1 15) D5 किं नु D8-10 रुत्कारण (for तत्का°) —(1 16) G3 इह (for इव) B4 श्रीमान्दशरथात्मज (for the post. half) —(1 18) B4 M2 [अ]कारणे (M2 °ण) (for [अ]कारणे) T2 आहरन् (for °रेत्) D5 8-10 नरपुगव (for नरसत्तम) B4 आनयैनैव सत्तम (for the post. half) —(1 19) T2 यद्यस्ति, T3 G2 M3 यदस्य (for यद्यस्य) T1 बुध्यते (for बुध्यसे) —(1 20) D5 8-10 क्षिप्रमेवाभिधीयता (for the post. half) B4 तत्पश्य वानरीश्रेष्ठे येन कोपवश व्रजेत् —(1 21) B4 द्रष्टुम् (for स्वयम्). G3 एनैव (meta) B4 क्षिप्रम्, D5 6 प्रष्टुम् (for द्रष्टुम्). M3 भाषितु (for भामिनि). —(1 22) B4 दृष्ट्वा चानुनयै सर्वं (for the prior half) —(1 23) D5 8-10 T2 G1 त्वद्दर्शने (for °र्शन-) D5 विरुद्धात्मा (for -विशु°) M1 मा (for न) D5 6 8-10 T2 G2 3 M1 स्म (for स) —(1 24) B4 कोप (for कचित्) —(1 25) B4 शातैर्, D10 यातैर् (for सान्त्वैर्) B4 -[आ]यत- (for -[इ]न्द्रिय-) G3 -मानस (for °सम्) —D9 om from 1 27 up to न in 1 30 —(1. 27) B4 विस्फुरती (for प्रस्खलन्ती). B4 मदसकुलाक्षी, D6 G3 °विह्वलागी (for °लाक्षी). —(1 28) B4 -हेमभूषिता, D5 -नद्धसूत्रा (for -हेमसूत्रा) —(1 29) B4 T2 G1 सुलक्षणा, D5 सल्लक्षण, Cr m g as above (for °णा) B4 लक्ष्मणमाससाद —(1. 30) B4 तारा स्थिता द्वारि गृहस्य तस्य —(1 31) D10 [इ]व (for [ए]व) —(1 32) B4 विश्वासयान प्रणयप्रगल्भा. —D6 reads 1 34 in marg. —(1 34) G3 च (for वि-) —(1. 35) D6 M3 विनिवृत्तलज्जा, T2 च विमुक्तलज्जा (for च निर्°) —(1 36) B4 दृष्टप्रचाराच्च, G2 3 M1 2 दृष्टिप्रचाराच् (for दृष्टिप्रसादाच्) —(1 37) D6 रामा (for तारा) B4 प्रणयप्रसुप्त (for °गल्भ) —(1 38) B4 परिमासपूर्वं, D5 6-10 परि(D5 9 °ति)मात्वरूप, T2 परिसात्वयुक्त (for °पूर्वम्) ॐ Ct परिमान्त्वरूप परित सान्त्वरूपम्। 'परिसात्व' इति पाठ समम ॐ —(1 39) T2 कोपपूर्व (for °मूल) —(1 40) B4 वा निष्ठति (for स°). B4 सनिदेशे, D5 शासनेषु, D9 वा हि देशे (for वाक्यनिर्देशे). ॐ Cr g सनिष्ठनीति परस्मैपदमार्षम्(Cg °त्यार्षं परस्मैपदम्) ॐ —(1 41) D6 आहरत (for आपतन्त) —(1 42) B4 D9 G2 दावाग्निम् (for दवा°) B4 आसेवति (for आसीदति) M3 निर्विशङ्क —After 1 42, B4 ins colophon [—*Sarga name* लक्ष्मणप्रवेश —*Sarga no.* (figures, words or both) 34]—(1 43) B4 शातपूर्वम् (for सान्त्व°) D6 T2 3 G M2 अशङ्कित (for °त) —(1 45) T2 मन् (for ते) —(1 46) D8 भर्तुर्हिते (for भर्तृ°) B4 चैनम् (for युक्ते) D6 8-10 G2 3 M2 3 [ए]नम् (for [ए]वम्) D5 G1 अवबुध्यते (for अनुबुध्यसे) B4 अनुमत्त न बुध्यसे (for the post half) ॐ Cm युक्ते! इति सबोधनम्।, so also Cg ॐ —(1 47) D6 स (for न) B4 कार्यार्थं (for राज्यार्थं). D8-10 M3 सोसाच् B4 लोक- (for शोक-) —(1 48) B4 सामात्य, D8-10 सामान्य- (for सामात्य-) D8-10 कामम् (for पानम्) B4 [उ]पसर्पति (for °सेवते) ॐ Ck सामान्यपरिषद्। भूवेति शेष।, Ct सामान्या परिषद्यस्य तादृशो भूवेति शेष. ॐ —(1 49) D9 T2 मासा (for मासाच्). B4 प्लवगर्षभ, M3 प्रवगेश्वर

व्यतीतास्तान्मदव्यग्रो विहरन्नावबुध्यते । [50]
न हि धर्मार्थसिद्धयर्थं पानमेव प्रशस्यते ।
पानादर्थश्च कामश्च धर्मश्च परिहीयते ।
धर्मलोपो महास्तावत्कृते ह्यप्रतिकुर्वत ।
अर्थलोपश्च मित्रस्य नाशे गुणवतो महान् ।
मित्र ह्यर्थगुणश्रेष्ठ सत्यधर्मपरायणम् । [55]
तद्भय तु परित्यक्त न तु धर्मे व्यवस्थितम् ।
तदेव प्रस्तुते कार्ये कार्यमस्माभिरुत्तरम् ।
यत्कार्यं कार्यतत्त्वज्ञे तदुदाहर्तुमर्हसि ।
मा तस्य धर्मार्थसमाधियुक्त
निशम्य वाक्य मधुरस्वभावम् । [60]
तारा गतार्था मनुजेन्द्रकार्ये
विश्वासयुक्त तमुवाच भूय ।
न कोपकाल क्षितिपालपुत्र
न चापि कोप स्वजने विधेय ।
त्वदर्थकामस्य जनस्य तस्य [65]
प्रमादमप्यर्हसि वीर सोढुम् ।
कोप कथ नाम गुणप्रकृष्ट
कुमार कुर्यादपकृष्टसत्त्वे ।

क्रस्त्वद्विध कोपवश हि गच्छे-
त्सत्त्वावरुद्धस्तपस प्रसूति । [70]
जानामि रोष हरिवीरबन्धो-
र्जानामि कार्यस्य च कालसगम् ।
जानामि कार्यं त्वयि यत्कृत न-
स्तच्चापि जानामि यदत्र कार्यम् ।
तच्चापि जानामि यथाविधय [75]
बल नरश्रेष्ठ शरीरजस्य ।
जानामि यस्मिश्च जनेऽवबद्ध
कामेन सुग्रीवमसक्तमद्य ।
न कामतन्त्रे तव बुद्धिरस्ति
त्व वै यथा मन्युवश प्रपन्न । [80]
न देशकालौ हि न चार्थधर्मा-
ववेक्षते कामरतिर्मनुष्य ।
त कामवृत्त मम सनिकृष्ट
कामाभियोगाच्च विमुक्तलज्जम् ।
क्षमस्व तावत्परवीरहन्त- [85]
स्त्वद्भ्रातर वानरवशनाथम् ।

(after corr *sec m* as above) (for प्लवगेश्वर) —(1 50) B4 चतुरो मासान्, D5 8–10 T1 तान्मदोद्ग्रो (for तान्मदव्यग्रो) D10 T2 G2 नावबुध्यसे (for °ते) B4 विहृत्य न च बुध्यसे (for the post half) —(1 51) T1 धर्मात्म- (for धर्मार्थ-) B4 -र्हिमार्थान्, G3 -वृद्धयर्थ (for -सिद्धयर्थ) D6 T1 3 G1 2 M2 3 एव (for एव) —(1 52) D6 T G M2 3 transp कामश्च and धर्मश्च B4 पानस्यार्थस्तु धर्मश्च कामस्य विधिरुत्तम —(1 53) B4 तावत्कृतस्य, T2 तावत्कृत्ये हि, G2 तावत्कृतेषु (for °त्कृते हि) B4 [अ]प्रतिकारत (for °कुवत) —(1 54) M1 धर्म- (for अर्थ-) —B4 om l 55 —(1 56) G3 M वय (for द्वय) B4 च (for तु in both the places) D5 6 G M2 व्यवस्थित T2 तत्र धर्मव्यवस्थित (for the post half) —(1 57) D5 प्रस्थिते (for प्रस्तुते) T2 उत्तम —(1 58) B4 D5 8–10 तत् (for यत्) D8–10 T1 G1 त्वम् (for तद्) —(1 60) B4 -स्वभावा (for -स्वभावम्) —(1 61) D8–10 T3 M1 गतार्थे, G3 कृतार्था (for °र्था) ❀ Cr m गतार्था अवगतार्था(Cm °तप्रयोजना) ।, Cg गतार्थे प्रयोजनयुक्ते ।, Ck अगतार्थे ऽभ्रष्टप्रयोजने (?) ।, Ct अगतार्थे भ्रष्टप्रयोजने ❀—(1 62) B4 विश्वासभूत (for °युक्त) G3 तद् (for तम्) —(1 64) B4 वीर, D6 चाति- (for चापि) B4 च कार्य, T2 विधेये (for विधेय) —(1 65) B4 तवार्थदृष्टस्य (for त्वदर्थकामस्य) —(1 66) B4 कर्तु (for सोढुम्) —(1 67) T2 गुणप्रविष्ट, M1 °प्रणष्ट (for गुणप्रकृष्ट) —(1 69) B4 कोपवशे, T2 °विध (for कोपवश) B4 तिष्ठेत् (for गच्छेत्) —(1 70) G1 सत्त्वाविरुद्धस्, M3 तत्त्वा° (for सत्त्वावरुद्धस्) B4 सत्त्वाविरुद्धस्तमस प्रभेव ❀ Cv सत्त्वावरुद्ध सत्त्वगुण (निरुद्ध ?) ।, Cr m सत्त्वावरुद्धो रजस्तमसोरनुप्रवेशाय सत्त्वगुणेन (Cr °णे) निरुद्ध ।, Cg सत्त्वावरुद्धो व्यवसाययुक्त ।, Ck सत्त्वाविरुद्ध सहजसत्त्वगुणाविरुद्धव्यापार ।, Ct सत्त्वावरुद्ध सहजसत्त्वगुणावरुद्धविपरीतव्यापार । 'सत्त्वाविरुद्ध' इति पाठे सहज(सत्त्व ?)गुणाविरुद्धव्यापार ❀—(1 71) B4 D5 दोष, D8–10 T2 M1 Ck t कोप, Cv r m g as above (for रोष) —(1 72) T2 कोपस्य (for कार्यस्य) B4 कालसगात् (for °सगम्) —(1 73) B4 तव (for त्वयि) —(1 75) D5 8–10 Ck t तथा, Cr m g as above (for यथा) —(1 77) B4 तु जटेव बद्ध, T3 च जनेवबध, M1 तव वधमस्य (for च जनेऽवबद्ध) —(1 78) B4 अदीनसत्त्व, D6 अशक्त° (for असक्तमद्य) —After l 78, B4 ins

तव प्रसादाद्विनिवृत्तकोपा
सुहृत्सहाया यदि वर्तयेम ।
यदप्रिय ते नरराजपुत्र
प्राप्ता स्म दण्डेश्वर पश्य दण्डम् ।

—(1 79) B4 कामतन्त्रे (for °तन्त्रे) —(1 80) B4 यतो, T3 यया (for यथा) —(1 81) M3 नरेंद्र कालो (for न देश-कालौ) M1 च (for हि) B4 न चार्थधर्मान्, D5 6 8–10 Ct यथार्थधर्मात्, Cv r as above (for न चार्थधर्मान्) —(1 82) D6 G2 3 M Cr अपेक्षते, D8 10 अवेक्ष्यते, Cv t as above (for अवेक्षते) B4 कामवृत्तिर्न वेत्सि, D10 कामरतिर्मनुष्य —(1 83) M1 मयि, M2 मद्-, Cg t as above (for मम) D5 M2 सनिकृष्टे(M2 °विष्ट), B4 तत्कालदृष्ट मयि सनिकृष्ट —(1 84) T1 3 M3 निवृत्तलज्ज (for विमुक्त°) B4 कामाभियोगप्रतिबद्धमज्ज —(1 85) G1 -हता (for -हन्तस्) —(1 86) D6 त, T2 त्व (for त्वद्-) T2 मानव- (for वानर-) —B4 om l 87–90

महर्षयो धर्मतपोभिरामा
कामानुकामा प्रतिबद्धमोहा ।
अय प्रकृत्या चपल कपिस्तु
कथ न सज्जेत सुखेषु राजा । [90]
इत्येवमुक्त्वा वचन महार्थं
सा वानरी लक्ष्मणमप्रमेयम् ।
पुन सखेल मदविह्वल च
भर्तुर्हित वाक्यमिद बभाषे ।
उद्योगस्तु चिराज्ञप्त· सुग्रीवेण नरोत्तम । [95]
कामस्यापि विधेयेन तवार्थप्रतिसाधने ।
आगता हि महावीर्या हरय कामरूपिण ।
कोटीशतसहस्राणि नानानगनिवासिन· ।
तदागच्छ महाबाहो चारित्र रक्षितं त्वया ।
अच्छल मित्रभावेन सता दारावलोकनम् । [100]
तारया चाप्यनुज्ञातस्त्वरया चाभिचोदित ।
प्रविवेश महाबाहुरभ्यन्तरमरिंदम ।

18

After 4 32 26, Ś1 Ñ1 B4 D1 (after 4 32 25^{ab} [1])–4 11–13 ins, while Ñ2 V B1–3 D7 (all due to om) ins after 26^{cd}

सहोपविष्टं हृष्टाभि कुबेरमिव नन्दने ।
स्त्रीभि परमरूपाभिर्वृत शतसहस्रश ।
अप्सरोभि परिवृत महेन्द्रमिव नन्दने ।
वामपार्श्वे स्थिता चास्य तारा ताराधिपानना ।
रुमा च दक्षिणे पार्श्वे सुग्रीवस्य महात्मन । [5]
शुक्रे च बालव्यजने तप्तकाञ्चनभूषिते ।
दोधूयमाने नारीभ्यामभित स ददर्श ह ।
त दृष्ट्वा तस्य ललितमौदासीन्यं च लक्ष्मण ।
विषमत्व च रामस्य द्विगुण क्रोधमूर्छित ।
त क्रोधाद्रक्तनयन कुर्वन्त भ्रुवमुन्मुखम् । [10]
दष्टाधरौष्ठपुटक प्रेक्षमाण समन्तत ।

—(1 87) D6 T2 3 M1 Cg धर्मतपोमिकामा, G2 °धियो विरामा (for धर्मतपोभिरामा) —(1 88) D9 om (hapl) कामानु T2 G3 M1 कामाभिकाम(T2 °मात्)-, Cm g k t as above (for कामानुकामा) M1 प्रतिपन्न- (for प्रतिबद्ध) —(1 90) D6 reads after कथ न in marg —(1 91) D8 10 उक्ता (for उक्त्वा) —(1 93) B4 D5 8–10 सखेद (for °ल). D8–10 मदविह्वलाक्षी, G1 2 मदविह्वला च, M1 * * * ल च (for मदविह्वल च) ❀ Cv सखेलमिति सम्यक् ।, Cr सखेदमिति सम्यक् ।, Cg सखेल सलीलम् ❀ —(1 95) B4 च (for तु) D6 चिराज्ञप्त (for चिराज्ञप्त) G1 M2 नरेश्वर (for नरोत्तम) —G3 damaged from विधेयेन up to आगता हि म in 1 97 —(1 96) B4 G2 M1 -प्रतिपादने (for °साधने) —(1 97) M1 महावीर (for °र्या) —(1 98) B4 D8 10 M2 कोटी (for कोटी-) ❀ Ck कोटी शतसहस्राणीति बहुत्वमात्रे तात्पर्यं न तु सख्यायाम् ।, so also Ct ❀ B4 नानानग-विलासिन, T1 नानावरनिवासिन, G3 M1 नानानगनि(M1 °र) वासिन (G3 °ना) (for the post half) ❀ Cv r नानानगनि(Cr °र)वासिन इति सम्यक् ❀ —(1 99) M1 रक्षित * * (damaged) (for रक्षित त्वया). —(1 100) D10 आछल, T2 उच्छल, T3 अचल, G1 आजल, Cv r m k t as above (for अच्छल) D5 T1 3 G1 3 M2 -भवने, Ck t as above (for -भावेन). D5 सतो (for सता) B4 अचिंत चित्रभवने सता दारावलोकने —(1 101) D6 T M चाभि- (for चापि) —G3 damaged from चाभि up to अन्यन्त in 1 102 D5 9 M3 चापि, D8 10 I1 वापि (for चाभि-)

18

